*** अधोलिखितानाम् प्रश्नानाम् उत्तराणि प्रदत्तविकल्पेभ्यः चित्वा लिखत।** **[13]**

1. भगवान् धन्वन्तरिः कस्य पूज्यः देवः वर्तते?

(A) गणितस्य (B) आयुर्वेदस्य (C) ऋग्वेदस्य (D) शिल्पस्य

**उत्तर :** (B) आयुर्वेदस्य

2. कस्य अनुसारं भोक्तव्यम्?

(A) बलस्य (B) मनसः (C) इच्छायाः (D) ऋतोः

**उत्तर :** (D) ऋतोः

3. 'कोऽरुक्? कोऽरुक्? कोऽरुक्?' इति पाठस्य क्रमः कः?

(A) पञ्चमः (B) सप्तमः (C) अष्टमः (D) नवमः

**उत्तर :** (D) नवमः

4. विस्मिताः शिष्याः कस्य समीपम् आगत्य अपृच्छन्?

(A) वाग्भटस्य (B) शुकस्य (C) चरकस्य (D) धन्वन्तरेः

**उत्तर:** (A) वाग्भटस्य

5. सर्वे कीदृशाः भवन्तु?

(A) निर्धनाः (B) सुखिनः (C) रोगिणः (D) वीराः

**उत्तर :** (B) सुखिनः

6. सर्वे भवन्तु सुखिनः।

(A) संसारे सर्वे जनाः सुखेन निवसेयुः। (B) संसारे सर्वे जनाः सुखिनः न भवन्ति।

(C) संसारे सर्वे जनाः सुखम् इच्छन्ति। (D) संसारे सर्वे जनाः सुखेन न निवसेयुः।

**उत्तर:** (A) संसारे सर्वे जनाः सुखेन निवसेयुः।

7. 'कोऽरुक्' इत्यत्र 'अरुक्' पदस्य कोऽर्थः?

(A) रुग्णः (B) नीरोगः (C) निर्बलः (D) सबलः

**उत्तर :** (B) नीरोगः

8. वाग्भटः कः आसीत्?

(A) ज्योतिषज्ञ : (B) तान्त्रिकः (C) वैद्यः (D) वैज्ञानिकः

**उत्तर :** (C) वैद्यः

9. वाग्भटः सूत्ररूपाणि कति उत्तराणि प्राददात्?

(A) चत्वारि (B) पञ्च (C) त्रीणि (D) षट्

**उत्तर :** (C) त्रीणि

10. बुभुक्षायाञ्च भोजनम्।

(A) यदा उदरे बुभुक्षा न भवति तदैव भोजनं ग्रहणीयम्।

(B) यदा उदरे बुभुक्षा भवति तदैव भोजनं ग्रहणीयम्।

(C) यदा उदरे बुभुक्षा भवति तदा भोजनं न ग्रहणीयम्।

(D) यदा उदरे बुभुक्षा शान्ता भवति तदनन्तरं भोजनं ग्रहणीयम्।

**उत्तर :** (B) यदा उदरे बुभुक्षा भवति तदैव भोजनं ग्रहणीयम्।

11. मा कश्चिद् दुःखभाग्भवेत्।

(A) कश्चिद् जनः यदा-कदा दुःखं प्राप्नुयात्।

(B) सर्वे जनाः कश्चिद् अपि दुःखम् अवश्यं प्राप्नुवन्ति।

(C) कश्चिद् अपि जनः सर्वदा दुःखस्य निवारणं न करोति।

(D) कश्चिद् अपि जनः कदापि दुःखं न प्राप्नुयात्।

**उत्तर :** (D) कश्चिद् अपि जनः कदापि दुःखं न प्राप्नुयात्।

12. वाग्भटः कीदृशं शुकम् अपश्यत्?

(A) रुदन्तम् (B) विकरालम् (C) क्रुद्धम् (D) मनोहरम्

**उत्तर :** (D) मनोहरम्

13. शुक रूपेण कः आसीत्?

(A) धन्वन्तरिः (B) वाग्भटः (C) चरकः (D) सुश्रुतः

**उत्तर:** (A) धन्वन्तरिः

*** अधोलिखित वाक्येषु रिक्तस्थानानि कोष्ठकेभ्यः उचित पदं चित्वा।** **[11]**

14. ____________ जनाः कथं निरामयाः भवन्ति? (भारतवर्षे / आयुर्वेदज्ञानेन)

**उत्तर :** भारतवर्षे

15. महर्षेः ____________ नाम भवन्तः श्रुतवन्तः स्युः। (चरकस्य / कुटीरसमीपं)

**उत्तर :** चरकस्य

16. शुकः ____________ कुटीरसमीपं गतवान्। (वाग्भटस्य / इन्द्रस्य)

**उत्तर :** वाग्भटस्य

17. ततः शुकरूपः ____________ वाग्भटम् उक्तवान्। (धन्वन्तरिः / चरकः)

**उत्तर :** धन्वन्तरिः

18. वाग्भटः ____________ दिक्षु अपश्यत्। (सर्वासु / सर्वे)

**उत्तर :** सर्वासु

19. सः ____________ विहगाय फलानि समर्पितवान्। (तम् / तस्मै)

**उत्तर :** तस्मै

20. छात्राः पुनः जिज्ञासया ____________। (अपृच्छन् / अपृच्छत्)

**उत्तर :** अपृच्छन्

21. सर्वे ____________ पश्यन्तु। (भद्राणि / फलानि)

**उत्तर :** भद्राणि

22. अन्ते सः वैद्यस्य वाग्भटस्य __________ गतवान्। (कुटीरसमीपं / भारतवर्षे)

**उत्तर :** कुटीरसमीपं

23. तव उत्कृष्टेन __________ अहम् अतीव सन्तुष्टः अस्मि। (आयुर्वेदज्ञानेन / अतिमात्रं)

**उत्तर :** आयुर्वेदज्ञानेन

24. लघुद्रव्याणि __________ सेवनेन हानिकराणि जायन्ते। (आयुर्वेदज्ञानेन / अतिमात्रं)

**उत्तर :** अतिमात्रं

*** स्तम्भयोः मेलनं कुरुत।** **[12]**

| शब्दाः | अर्थाः |
|---|---|
| 25. अरुक् | (क) नीरोगिणः |
| 26. झटिति | (ख) भुक्तात् |
| 27. निरामयाः | (ग) शीघ्रम् |
| 28. अशिताद्यात् | (घ) स्वस्थः |

**उत्तर :** (1 - घ, 2 - ग, 3 - क, 4 - ख)

| शब्दाः | अर्थाः |
|---|---|
| 29. खगः | (क) प्रसन्नः |
| 30. दृष्ट्वा | (ख) विहगः |
| 31. प्रीतः | (ग) क्षुधायाम् |
| 32. बुभुक्षायाम् | (घ) अवलोक्य |

**उत्तर :** (1 - ख, 2 - घ, 3 - क, 4 - ग)

| अ | ब |
|---|---|
| 33. अल्पादाने गुरूणां च | (क) नित्यं दन्तविशोधनम् |
| 34. मात्राकारणमुद्दिष्टं | (ख) लघूनां चातिसेवने |
| 35. व्यायामः प्रातरुत्थाय | (ग) बुभुक्षायाञ्च भोजनम् |
| 36. स्वच्छजलेन सुस्नानं | (घ) -द्रव्याणां गुरुलाघवे |

**उत्तर :** (1 - ख, 2 - घ, 3 - क, 4 - ग)

*** अधोलिखितानां प्रश्नानाम् एकपदेन उत्तरं लिखत।** **[5]**

37. शुक रूपं कः धृतवान्?

**उत्तर :** धन्वन्तरिः

38. ऋतवः कति सन्ति?

**उत्तर :** षट्

39. वाग्भटः शुकस्य रहस्यं केभ्यः उक्तवान्?

**उत्तर :** शिष्येभ्यः

40. अन्ते शुकः कस्य आश्रमस्य समीपं गतवान्?

**उत्तर :** वाग्भटस्य

41. धन्वन्तरिः (शुकः) कुत्र उपविश्य ध्वनिम् अकरोत्?

**उत्तर :** पुष्पतरुम्

*** पूर्णवाक्येन उत्तरं लिखत।** **[10]**

42. छात्राः पुनः जिज्ञासया आचार्यं किम् अपृच्छन्?

**उत्तर :** छात्राः पुनः जिज्ञासया आचार्यम् अपृच्छन् - 'आचार्य! 'हितभुक्, मितभुक्, ऋतुभुक्' इति एतेषां कः आशयः?

43. मधुरां वाणीं श्रुत्वा चिकित्सानिरतः वाग्भटः किम् अकरोत्?

**उत्तर :** मधुरां वाणीं श्रुत्वा चिकित्सानिरतः वाग्भटः प्राङ्गणम् आगत्य सर्वासु दिक्षु अपश्यत्।

44. वाग्भटः झटिति किम् अकरोत्?

**उत्तर :** वाग्भटः झटिति तस्मै शुकाय मधुराणि फलानि समर्पितवान्।

45. ऋषयः नित्यं कां प्रार्थनां कुर्वन्ति?

**उत्तर :** ऋषयः नित्यं प्रार्थनां कुर्वन्ति यत् -
सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्।।

46. भगवान् धन्वन्तरिः अस्माकं कृते संक्षेपेण किं प्रदत्तवान्?

**उत्तर :** भगवान् धन्वन्तरिः अस्माकं कृते संक्षेपेण स्वास्थ्यरक्षणाय सन्देशं प्रदत्तवान्।

*** रेखाङ्कित पदानि अधिकृत्य प्रश्ननिर्माणं कुरुत।** **[10]**

47. शुकरूपः धन्वन्तरिः वाग्भटम् उक्तवान्।

**उत्तर :** शुकरूपः **कः** वाग्भटम् उक्तवान्?

48. वाग्भटः मनोहरं शुकम् अपश्यत्।

**उत्तर :** वाग्भटः **कीदृशं** शुकम् अपश्यत्?

49. वैद्याः व्याधीनां शमनं कुर्वन्ति।

**उत्तर :** वैद्याः **कासां** शमनं कुर्वन्ति?

50. सः त्रीणि उत्तराणि प्राददात्।

**उत्तर :** सः **कति** उत्तराणि प्राददात्?

51. सः विहगायमधुराणि फलानि समर्पितवान्।

**उत्तर :** सः विहगाय **कानि** समर्पितवान्?

52. शुकः वाग्भटस्य कुटीरसमीपं गतवान्।

**उत्तर :** शुकः **कस्य** कुटीरसमीपं गतवान्?

53. <u>महर्षेः चरकस्य</u> नाम भवन्तः श्रुतवन्तः स्युः।

**उत्तर : कस्य** नाम भवन्तः श्रुतवन्तः स्युः?

54. वाग्भटः <u>छात्राणां</u> जिज्ञासाम् उपशमयन् कथयति।

**उत्तर :** वाग्भटः **केषां** जिज्ञासाम उपशमयन् कथयति?

55. सर्वे <u>भद्राणि</u> पश्यन्तु।

**उत्तर :** सर्वे **कानि** पश्यन्तु?

56. <u>ऋतोः</u> अनुसारं भोक्तव्यम्।

**उत्तर : कस्य** अनुसारं भोक्तव्यम्?

* **अधोलिखितानि क्रम रहित वाक्यानि घटना क्रमानुसारं संयोजनयत।** **[3]**

57. (i) तव उत्कृष्टेन आयुर्वेदज्ञानेन अहम् अतीव सन्तुष्टः अस्मि।
(ii) पुरा भगवान् धन्वन्तरिः शुकरूपं धृत्वा प्रतिग्रामम् अभ्रमत्।
(iii) वाग्भटः छात्राणां जिज्ञासाम् उपशमयन् कथयति।
(iv) सः मधुरया गिरा 'कोऽरुक्' 'कोऽरुक् "कोऽरुक्' इति शब्दम् अकरोत्।
(v) प्रीतः शुकः वाग्भटेन अर्पितानि फलानि खादितवान्।
(vi) वाग्भटः 'हितभुक्' 'मितभुक्' 'ऋतुभुक्' इति त्रीणि उत्तराणि प्राददात्।

**उत्तर :** (i) तव उत्कृष्टेन आयुर्वेदज्ञानेन अहम् अतीव सन्तुष्टः अस्मि।
(ii) पुरा भगवान् धन्वन्तरिः शुकरूपं धृत्वा प्रतिग्रामम् अभ्रमत्।
(iii) वाग्भटः छात्राणां जिज्ञासाम् उपशमयन् कथयति।
(iv) सः मधुरया गिरा 'कोऽरुक्' 'कोऽरुक् "कोऽरुक्' इति शब्दम् अकरोत्।
(v) प्रीतः शुकः वाग्भटेन अर्पितानि फलानि खादितवान्।
(vi) वाग्भटः 'हितभुक्' 'मितभुक्' 'ऋतुभुक्' इति त्रीणि उत्तराणि प्राददात्।

* **अधोलिखित गद्याश पठित्वा प्रश्नानाम् उत्तराणि लिखत।** **[70]**

58. एतत् सर्वं दूरात् पश्यन्तः विस्मिताः शिष्याः आचार्यवाग्भटस्य समीपम् आगत्य अपृच्छन् - "गुरुवर! शुकः 'कोऽरुक् कोऽरुक् कोऽरुक्' इति उक्तवान्, तस्य कोऽर्थः? अपि च भवान् किम् उत्तरं दत्तवान्?" तदा वाग्भटः छात्राणां जिज्ञासाम् उपशमयन् कथयति - "छात्राः, शृणुत! एषः शुकः वदति यत् कः अरुक् अर्थात् कः स्वस्थः नीरोगः वा वर्तते? तदा मया उक्तम् -
'यः हितभुक्, मितभुक्, ऋतुभुक् च, सः एव सर्वदा स्वस्थः भवति'।" छात्राः पुनः जिज्ञासया अपृच्छन् “आचार्य! 'हितभुक्, मितभुक्, ऋतुभुक' इति - एतेषां कः आशयः?" वाग्भटः वदति -“शिष्याः! महर्षेः चरकस्य नाम भवन्तः श्रुवतन्तः स्युः।"
I. एकपदेन उत्तरत -
(i) विस्मिताः शिष्याः कस्य समीपम् आगत्य अपृच्छन्?
(ii) 'कोऽरुक्' इति कः उक्तवान्?
II. पूर्णवाक्येन उत्तरत -
(i) वाग्भटः केषां जिज्ञासाम् उपशमयन् कथयति?
(ii) कः एव सर्वदा स्वस्थः भवति?
III. निर्देशानुसारम् उत्तरत -

(i) 'शिष्याः' इति कर्तृपदस्य गद्यांशे क्रियापदं किम् अस्ति?
(अ) वदति (ब) अपृच्छन् (स) उक्तवान् (द) पश्यन्ति
(ii) 'कोऽरुक्' - इत्यत्र 'अरुक्' पदस्य कोऽर्थः?
(अ) नीरोगः (ब) निर्गतः (स) रोगयुक्तः (द) प्रसन्नः
(iii) 'दूरम्' इति पदस्य गद्यांशे विलोमपदं किम् अस्ति?
(अ) आगत्य (ब) पश्यन्तः (स) समीपम् (द) अपशमयन्

**उत्तर :** I. (i) आचार्यवाग्भटस्य।
(ii) शुकः।
II. (i) वाग्भटः छात्राणां जिज्ञासाम् उपशमयन् कथयति?
(ii) यः हितभुक्, मितभुक्, ऋतुभुक् च, सः एव सर्वदा स्वस्थः भवति।
III. (i) (ब) अपृच्छन्
(ii) (अ) नीरोगः
(iii) (स) समीपम्

59. एतत् सर्वं श्रुत्वा कश्चन छात्रः वाग्भटम् अपृच्छत्- "आचार्य! हितभुगादिविषये वयं तु ज्ञातवन्तः, किन्तु किं सः शुकः सन्तुष्टः अभवत् "? तदा वाग्भटः शुकस्य रहस्यम् उक्तवान् - "प्रियशिष्याः! अयं विहगः न सामान्यविहगः, अपि तु आयुर्वेदस्य पूज्यः देवः भगवान् धन्वन्तरिः एव स्वयं शुकरूपेण अत्र आगच्छत्। अस्माकं कृते संक्षेपेण स्वास्थ्यरक्षणाय सूत्ररूपेण सन्देशं च प्रदत्तवान्, भवन्तः अपि श्रृण्वन्तु स्मरन्तु च - "
I. एकपदेन उत्तरत -
(i) कश्चन छात्रः कम् अपृच्छत्?
(ii) वाग्भटः कस्य रहस्यम् उक्तवान्?
II. पूर्णवाक्येन उत्तरत -
(i) तत्र शुकरूपेण कः आगच्छत्?
(ii) भगवान् धन्वन्तरिः संक्षेपेण कस्मै सन्देशं प्रदत्तवान्?
III. निर्देशानुसारम् उत्तरत -
(i) 'अपृच्छत्' इति क्रियायाः गद्यांशे कर्तृपदं किम् अस्ति?
(अ) आचार्यः (ब) शिष्याः (स) छात्रः (द) शुकः
(ii) 'भगवान्' इति विशेषणस्य गद्यांशे विशेष्यपदं किम् अस्ति?
(अ) धन्वन्तरिः (ब) देवः (स) पूज्यः (द) शुकः
(iii) 'श्रुत्वा' इति पदे कः प्रत्ययः?
(अ) ल्यप् (ब) तव्यत् (स) अनीयर् (द) क्त्वा

**उत्तर :** I. (i) वाग्भटम्।
(ii) शुकस्य।
II. (i) तत्र शुकरूपेण आयुर्वेदस्य पूज्यः देवः भगवान् धन्वन्तरिः आगच्छत्।
(ii) भगवान् धन्वन्तरिः संक्षेपेण स्वास्थ्यरक्षणाय सन्देशं प्रदत्तवान्।
III. (i) (स) छात्रः
(ii) (अ) धन्वन्तरिः
(iii) (द) क्त्वा

60. अथ वैद्यः वाग्भटः अचिन्तयत् यत् यावत् खगः स्वप्रश्नानाम् उत्तराणि न प्राप्नोति तावत् अयं भोजनं न वाञ्छति इति। ततः सः अचिरादेव सूत्ररूपाणि त्रीणि उत्तराणि प्राददात्- 'हितभुक् "मितभुक् "ऋतुभुक्' इति। समुचितम् उत्तरं श्रुत्वा अत्यन्तं प्रीतः सः शुकः वाग्भटेन अर्पितानि फलानि खादितवान्।

ततः शुकरूपः धन्वन्तरिः वाग्भटम् उक्तवान् - "वत्स ! अहं धन्वन्तरिः अस्मि। उत्तमस्य वैद्यस्य अन्वेषणाय भारतवर्षे सर्वत्र परिभ्रमन् अत्र समागतः। तव उत्कृष्टेन आयुर्वेदज्ञानेन अहम् अतीव सन्तुष्टः अस्मि। त्वम् अवश्यमेव आयुर्वेद-अष्टाङ्गविचार-सारभूतं तन्त्रं विरचयेः" एतद् उक्त्वा सः अन्तर्हितः।

I. एकपदेन उत्तरत -

(i) वाग्भटः कति उत्तराणि प्राददात्?

(ii) शुकरूपः कः आसीत्?

II. पूर्णवाक्येन उत्तरत -

(i) प्रीतः शुकः कानि खादितवान्?

(ii) शुकः किमर्थं भारतवर्षे सर्वत्र अभ्रमत्?

III. निर्देशानुसारम् उत्तरत -

(i) 'प्राप्नोति' इति क्रियापदस्य गद्यांशे कर्तृपदं किम् अस्ति?

(अ) शुकः (ब) वाग्भटः (स) खगः (द) धन्वन्तरिः

(ii) 'यावत्' इति पदस्य गद्यांशे विलोमपदं किम् अस्ति?

(अ) तावत् (ब) तदा (स) अचिरात् (द) यदि

(iii) 'अहम् अतीव सन्तुष्टः अस्मि' - अत्र 'अहम्' सर्वनामपदस्य स्थाने संज्ञापदं किम्?

(अ) वाग्भटः (ब) शिष्यः (स) इन्द्रः (द) धन्वन्तरिः

**उत्तर :** I. (i) त्रीणि।

(ii) धन्वन्तरिः।

II. (i) प्रीतः शुकः वाग्भटेन अर्पितानि फलानि खादितवान्।

(ii) शुकः उत्तमस्य वैद्यस्य अन्वेषणाय भारतवर्षे सर्वत्र अभ्रमत्।

III. (i) (स) खगः

(ii) (अ) तावत्

(iii) (द) धन्वन्तरिः

61. 'भारतवर्षे वैद्याः विभिन्नानां व्याधीनां शमनं कथं कुर्वन्ति' इति ज्ञातुं पुरा भगवान् धन्वन्तरिः मनोहरं शुकरूपं धृत्वा प्रतिग्रामम् अभ्रमत्। भ्रमणकाले सः बहूनां प्रख्यातवैद्यानां भवनपार्श्वस्थे वृक्षे उपविश्य 'कोऽरुक्' 'कोऽरुक्' 'कोऽरुक्' इति ध्वनिम् अकरोत्। किन्तु खगस्य 'कोऽरुक्' इति शब्दं प्रति कस्यापि अवधानं नासीत्।

I. एकपदेन उत्तरत -

(i) भगवान् धन्वन्तरिः शुकरूपं धृत्वा कुत्र अभ्रमत्?

(ii) खगस्य किं शब्दं प्रति कस्यापि अवधानं नासीत्?

II. पूर्णवाक्येन उत्तरत -

(i) भारतवर्षे वैद्याः किं कुर्वन्ति?

(ii) शुकः कुत्र उपविश्य ध्वनिम् अकरोत्?

III. निर्देशानुसारम् उत्तरत -

(i) 'वैद्याः' इति कर्तृपदस्य गद्यांशे क्रियापदं किम्?

(अ) अभ्रमत् (ब) कुर्वन्ति (स) अकरोत् (द) भ्रमन्ति

(ii) 'उपविश्य' इति पदे कः प्रत्ययः?

(अ) ल्यप् (ब) क्त्वा (स) तव्यत् (द) यत्

(iii) 'शुकरूपम्' इति विशेष्यपदस्य गद्यांशे विशेषणपदं किम्?

(अ) भगवान् (ब) पुरा (स) मनोहरम् (द) धन्वन्तरिः

**उत्तर :** I. (i) प्रतिग्रामम्

(ii) कोऽरुक्।

II. (i) भारतवर्षे वैद्याः विभिन्नानां व्याधीनां शमनं कुर्वन्ति।

(ii) शुकः प्रख्यातवैद्यानां भवनपार्श्वस्थे वृक्षे उपविश्य ध्वनिम् अकरोत्।

III. (i) (ब) कुर्वन्ति

(ii) (अ) ल्यप्

(iii) (स) मनोहरम्।

62. अन्ते सः वैद्यस्य वाग्भटस्य कुटीरसमीपं गतवान्। तत्र विशाले प्राङ्गणे स्थितं पुष्पतरुम् आरुह्य मधुरया गिरा 'कोऽरुक्' 'कोऽरुक्' 'कोऽरुक्' इति शब्दम् अकरोत्। मधुरां वाणीं श्रुत्वा चिकित्सानिरतः वाग्भटः प्राङ्गणम् आगत्य सर्वासु दिक्षु अपश्यत्। क्षणात् वाग्भटः मनोहरं तं शुकम् अपश्यत्। सार्थकं मानुषध्वनिं कुर्वन्तं शुकं दृष्ट्वा विस्मितः वाग्भटः चिन्तितवान् - "नायं लौकिकः खगः। एषः निश्चयेन कश्चन देवविशेषः अस्ति।" सः झटिति तस्मै विहगाय मधुराणि फलानि समर्पितवान् परन्तु सः खगः फलानि न गृहीत्वा पुनरपि तथैव 'कोऽरुक्' 'कोऽरुक्' 'कोऽरुक्' इति प्रश्नस्वरेण शब्दमकरोत्।

I. एकपदेन उत्तरत -

(i) शुकः कस्य कुटीरसमीपं गतवान्?

(ii) कः सार्थकं मानुषध्वनिम् अकरोत्?

II. पूर्णवाक्येन उत्तरत -

(i) विस्मितः वाग्भटः किं चिन्तितवान्?

(ii) वाग्भटः विहगाय कानि समर्पितवान्?

III. निर्देशानुसारम् उत्तरत -

(i) 'दिक्षु' इति विशेष्यपदस्य गद्यांशे विशेषणपदं किम्?

(अ) तस्मिन् (ब) सर्वासु (स) तासु (द) मनोहरम्

(ii) 'अपश्यत्' इति क्रियापदस्य गद्यांशे कर्तृपदं किम् अस्ति?

(अ) शुकः (ब) खगः (स) वैद्यः (द) वाग्भटः

(iii) 'शीघ्रम्' इत्यर्थे गद्यांशे किं पदं प्रयुक्तम्?

(अ) झटिति (ब) पुनरपि (स) तीव्रम् (द) त्वरितम्

**उत्तर :** I. (i) वाग्भटस्य।

(ii) शुकः।

II. (i) विस्मितः वाग्भटः "नायं लौकिकः खगः। एष निश्चयेन कश्चन देवविशेषः अस्ति" इति चिन्तितवान्।

(ii) वाग्भटः विहगाय मधुराणि फलानि समर्पितवान्।

III. (i) (ब) सर्वासु

(ii) (द) वाग्भटः

(iii) (अ) झटिति

63. "मितभुक्-विषये कथयति आचार्यः -

अल्पादाने गुरूणां च लघूनां चातिसेवने।
मात्राकारणमुद्दिष्टं द्रव्याणां गुरुलाघवे ॥

अर्थात् गरिष्ठद्रव्याणि अपि अल्पमात्रं सेवनेन सुपाच्यानि भवन्ति, लघुद्रव्याणि चापि अतिमात्रं सेवनेन हानिकराणि जायन्ते। अतः मात्रानुसारम् एव खादितव्यम्।

I. एकपदेन उत्तरत -

(i) आचार्यः कस्मिन् विषये कथयति?

(ii) कथम् खादितव्यम्?

II. पूर्णवाक्येन उत्तरत -

(i) गरिष्ठद्रव्याणि अपि कथं सुपाच्यानि भवन्ति?

(ii) गुरुलाघवे किं कारणम् उद्दिष्टम्?

III. निर्देशानुसारम् उत्तरत -

(i) 'आचार्यः' इति कर्तृपदस्य क्रियापदं किम् अस्ति?

(अ) वदति (ब) कथयति (स) भवति (द) अस्ति

(ii) 'गुरूणाम्' इति पदस्य श्लोके विलोमपदं किम्?

(अ) अल्पानां (ब) अतिसेवनं (स) द्रव्याणाम् (द) लघूनाम्

(iii) 'द्रव्याणाम्' इति पदे का विभक्तिः अस्ति?

(अ) षष्ठी (ब) सप्तमी (स) पंचमी (द) तृतीया

**उत्तर :** I. (i) मितभुक्-विषये

(ii) मात्रानुसारम्

II. (i) गरिष्ठद्रव्याणि अपि अल्पमात्रं सेवनेन सुपाच्यानि भवन्ति।

(ii) गुरुलाघवे द्रव्याणां मात्रा कारणम् उद्दिष्टम्।

III. (i) (ब) कथयति

(ii) (द) लघूनाम्

(iii) (अ) षष्ठी

64. सः हितभुक्-विषये कथयति -

तच्च नित्यं प्रयुञ्जीत स्वास्थ्यं येनानुवर्तते।
अजातानां विकाराणामनुत्पत्तिकरं च यत् ॥

अर्थात् यस्य आहारस्य सेवनेन स्वास्थ्यस्य रक्षणं भवेत्, न जातानाम् अर्थात् अनुत्पन्नानां विकाराणाम् उत्पत्तिः न भवेत्, तादृशः आहारः सेवनीयः।

I. एकपदेन उत्तरत -

(i) सः कस्मिन् विषये कथयति?

(ii) हितभुक् कम् अनुवर्तते?

II. पूर्णवाक्येन उत्तरत -

(i) श्रेष्ठभोजनं केषाम् अनुत्पत्तिकरं भवेत्?

(ii) कीदृशं भोजनं नित्यं सेवनीयम्?

III. निर्देशानुसारम् उत्तरत -

(i) 'सः' इति कर्तृपदस्य क्रियापदं किम् अस्ति?

(अ) कथयति (ब) वदति (स) अनुवर्तते (द) प्रयुञ्जीत

(ii) 'विकाराणाम्' इति विशेष्यपदस्य विशेषणं किम् अस्ति?

(अ) स्वास्थ्यम् (ब) जातानाम् (स) अजातानाम् (द) अनुत्पत्तिकरं

(iii) 'भोजनम्' इत्यर्थे अत्र किं पदं प्रयुक्तम्?

(अ) विहारः (ब) आहारः (स) नित्यम् (द) खाद्यम्

**उत्तर :** I. (i) हितभुक्-विषये

(ii) स्वास्थ्यम्

II. (i) श्रेष्ठभोजनम् अजातानां विकाराणाम् अनुत्पतिकरं भवेत्।

(ii) येन स्वास्थ्यस्य रक्षणं भवेत् तथा अनुत्पन्नानां विकाराणाम् उत्पत्तिः न भवेत् तादृशं भोजनं नित्यं सेवनीयम्।

III. (i) (अ) कथयति

(ii) (स) अजातानाम्

(iii) (ब) आहारः

65. "एवमेव ऋतुभुक्-विषये उच्यते -
तस्याशिताद्यादाहारात् बलं वर्णश्च वर्धते।
तस्यर्तुसात्म्यं विदितं चेष्टाहारव्यपाश्रयम् ॥
अर्थात् ग्रीष्मः, वर्षा, शरद्, शिशिरः, हेमन्तः, वसन्तः चेति षट् ऋतवः भवन्ति। यः पुरुषः ऋतूनाम् अनुकूलं स्वास्थ्यप्रदम् आहारसेवनं जानाति तदनुसारम् आचरणं च करोति तस्य जनस्य अशितम् अर्थात् भुक्तं पीतं च सर्वमपि बलवर्धकं, वर्णकान्तिजनकं, सुखवर्धकम्, आयुर्वर्धकञ्च भवति। अतः ऋतोः अनुसारं भोक्तव्यम् इति। नियमितरूपेण समयानुसारं सात्त्विकं भोजनम् आवश्यकमिति ऋतुभुक्-पदेन ज्ञायते।"

I. एकपदेन उत्तरत -
(i) कति ऋतवः भवन्ति?
(ii) कस्य अनुसारं भोक्तव्यम्?
II. पूर्णवाक्येन उत्तरत -
(i) जनस्य कस्मात् बलं वर्णः च वर्धते?
(ii) कीदृशं भोजनम् आवश्यकम्?
III. निर्देशानुसारम् उत्तरत -
(i) 'षट्' इति विशेषणस्य गद्यांशे विशेष्यपदं किम्?
(अ) ऋतवः (ब) ऋतोः (स) वसन्तः (द) ग्रीष्मः
(ii) 'जानाति' इति क्रियापदस्य कर्तृपदं किम् अस्ति?
(अ) आहारं (ब) तस्य (स) पुरुषः (द) जनस्य
(iii) 'भुक्तात्' इत्यर्थे श्लोके किं पदं प्रयुक्तम्?
(अ) आहारात् (ब) अशिताद्यात् (स) साम्यात् (द) पीतात्

**उत्तर :** I. (i) षट्
(ii) ऋतो :
II. (i) जनस्य अशिताद्यात् आहारात् बलं वर्णः च वर्धते।
(ii) नियमितरूपेण समयानुसारं सात्विकं भोजनम् आवश्यकम्।
III. (i) (अ) ऋतवः
(ii) (स) पुरुषः
(iii) (ब) अशिताद्यात्

66. "अस्माकम् ऋषयः नित्यं प्रार्थनाम् अपि कुर्वन्ति। वयमपि स्मरामः -
सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् ॥"

I. एकपदेन उत्तरत -
(i) सर्वे कीदृशाः भवन्तु?
(ii) सर्वे कानि पश्यन्तु?
II. पूर्णवाक्येन उत्तरत -
(i) सर्वे कीदृशाः सन्तु?
(ii) कश्चिद् किम् मा भवेत्?
III. निर्देशानुसारम् उत्तरत -
(i) 'पश्यन्तु' इति क्रियापदस्य कर्तृपदं किम् अस्ति?
(अ) भद्राणि (ब) सर्वे (स) कश्चिद् (द) निरामयाः
(ii) 'रोगरहिताः' इत्यर्थे श्लोके किं पदं प्रयुक्तम्?
(अ) भद्राणि (ब) सुखिनः (स) दुःखभाक् (द) निरामयाः

(iii) 'सन्तु' इति पदे कः लकारः वर्तते?
(अ) लोट् (ब) लङ् (स) लृट् (द) लट्

**उत्तर :** I. (i) सुखिनः।
(ii) भद्राणि।
II. (i) सर्वे निरामयाः सन्तु।
(ii) कश्चिद् दुःखभाक् मा भवेत्।
III. (i) (ब) सर्वे
(ii) (द) निरामयाः
(iii) (अ) लोट्।

67. व्यायामः प्रातरुत्थाय, नित्यं दन्तविशोधनम्।
स्वच्छजलेन सुस्नानं, बुभुक्षायाञ्च भोजनम् ॥
I. एकपदेन उत्तरत -
(i) व्यायामः कदा करणीयः?
(ii) सुस्नानं केन कार्यम्?
II. पूर्णवाक्येन उत्तरत -
(i) भोजनं कदा कर्त्तव्यम्?
(ii) दन्तविशोधनं कदा करणीयम्?
III. निर्देशानुसारम् उत्तरत -
(i) 'उत्थाय' इति पदे कः प्रत्ययः?
(अ) ल्यप् (ब) क्त्वा (स) यत् (द) तव्यत्
(ii) 'सायम्' इति पदस्य श्लोके विलोमपदं किम् अस्ति?
(अ) नित्यम् (ब) रात्रौ (स) प्रातः (द) विशोधनम्
(iii) 'बुभुक्षायाम्' इति पदे का विभक्तिः?
(अ) षष्ठी (ब) सप्तमी (स) पंचमी (द) द्वितीया

**उत्तर :** I. (i) प्रातः।
(ii) स्वच्छजलेन।
II. (i) भोजनं बुभुक्षायां कर्त्तव्यम्।
(ii) नित्यं प्रातः उत्थाय व्यायामं कृत्वा च दन्तविशोधनं करणीयम्।
III. (i) (अ) ल्यप्
(ii) (स) प्रातः
(iii) (ब) सप्तमी

*** समुचितपदेन रिक्तस्थानानि पूरयत, येन कथनानां भावः स्पष्टः स्यात्।** **[9]**

68. तच्च नित्यं प्रयुञ्जीत स्वास्थ्यं येनानुवर्तते।
यस्य आहारस्य सेवनेन ____________ रक्षणं भवेत् ____________ आहारः ____________ सेवनीयः।
[मञ्जूषा - तादृशः, प्रतिदिनं, स्वास्थ्यस्य]

**उत्तर :** यस्य आहारस्य सेवनेन स्वास्थ्यस्य रक्षणं भवेत्, तादृशः आहारः प्रतिदिनं सेवनीयः।

69. अल्पादाने गुरूणां च लघूनां चातिसेवने।
गरिष्ठद्रव्याणि अपि अल्पमात्रं सेवनेन ____________ भवन्ति, लघुद्रव्याणि चापि ____________ सेवनेन

____________ जायन्ते।
[मञ्जूषा - अतिमात्रं, , हानिकराणि, सुपाच्यानि]

**उत्तर :** गरिष्ठद्रव्याणि अपि अल्पमात्रं सेवनेन सुपाच्यानि भवन्ति, लघुद्रव्याणि चापि अतिमात्रं सेवनेन हानिकराणि जायन्ते।

70. व्यायामः प्रातरुत्थाय नित्यं दन्तविशोधनम्।
प्रतिदिनं ____________ एव जागरणं कुर्यात्, ततः परं ____________ करणीयः। पुनः सम्यक्तया ____________ करणीयम्।
[मञ्जूषा - व्यायामः, प्रातः, दन्तमार्जनं]

**उत्तर :** प्रतिदिनं प्रातः एव जागरणं कुर्यात्, ततः परं व्यायामः करणीयः। पुनः सम्यक्तया दन्तमार्जनं करणीयम्।

*** निम्नलिखितश्लोकानां मञ्जूषातः समुचितपदं चित्वा अन्वयं लिखत।** **[15]**

71. तच्च नित्यं प्रयुञ्जीत ............................ च यत्।।
अजातानां ____________ च यत् ____________ , येन ____________ अनुवर्तते च तत् नित्यं प्रयुञ्जीत।
[मञ्जूषा - स्वास्थ्यम्, विकाराणां, अनुत्पत्तिकरं]

**उत्तर :** अजातानां विकाराणां च यत् अनुत्पत्तिकरं, येन स्वास्थ्यम् अनुवर्तते च तत् नित्यं प्रयुञ्जीत।

72. अल्पादाने गुरूणां च ............................ गुरुलाघवे।।
गुरूणाम् (द्रव्याणाम्) ____________ (हितं भवति) लघूनां (द्रव्याणां) च ____________ (हानिः भवति)। ____________ (भोजनग्रहणे) द्रव्याणां मात्रा कारणम् उद्दिष्टम्।
[मञ्जूषा - गुरुलाघवे, अल्पादाने,अतिसेवने]

**उत्तर :** गुरूणाम् (द्रव्याणाम्) अल्पादाने (हितं भवति) लघूनां (द्रव्याणां) च अतिसेवने (हानिः भवति)। (भोजनग्रहणे) द्रव्याणां मात्रा कारणम् उद्दिष्टम्। (गुरुलाघवे)

73. तस्याशिताद्यादाहारात् ............................ व्यापाश्रयम्।।
तस्य (जनस्य) ____________ आहारात् बलं ____________ च वर्धते। तस्य चेष्टा आहारव्यपाश्रयम् ____________ विदितम्।
[मञ्जूषा - वर्णः, ऋतुसात्म्यं, अशिताद्यात्]

**उत्तर :** तस्य (जनस्य) अशिताद्यात् आहारात् बलं वर्णः च वर्धते। तस्य चेष्टा आहारव्यपाश्रयम् ऋतुसात्म्यं विदितम्।

74. व्यायामः प्रातरुत्थाय, ............................ भोजनम्।।
नित्यं प्रातः ____________ व्यायामः (करणीयः), ____________ (कर्तव्यम्), स्वच्छजलेन ____________ (कार्यम्), बुभुक्षायां च भोजनं (कर्तव्यम्)।
[मञ्जूषा - दन्तविशोधनं, उत्थाय, सुस्नानं]

**उत्तर :** नित्यं प्रातः उत्थाय व्यायामः (करणीयः), दन्तविशोधनं (कर्तव्यम्), स्वच्छजलेन सुस्नानं (कार्यम्), बुभुक्षायां च भोजनं (कर्तव्यम्)।

75. सर्वे भवन्तु सुखिनः ............................ दुःखभाग्भवेत्।।
सर्वे सुखिनः भवन्तु, सर्वे ____________ सन्तु। सर्वे ____________ पश्यन्तु, कश्चिद् ____________ मा भवेत्।
[मञ्जूषा - भद्राणि, दुःखभाक्, निरामयाः]

**उत्तर :** सर्वे सुखिनः भवन्तु, सर्वे निरामयाः सन्तु। सर्वे भद्राणि पश्यन्तु, कश्चिद् दुःखभाक् मा भवेत्।

----- -----